# संस्कृतपाठ्यक्रमः

## (सम्प्रेषण–उपागम–आधारितः)

नवमदशमश्रेणीभ्याम् संस्कृतभाषायाः प्रभाविशिक्षणार्थ केन्द्रियमाध्यमिकशिक्षासंघटनेन विकसितः सम्प्रेषण–उपागम–आधारित– द्विवर्षीयः एषः पाठ्यक्रमः। प्रायः अनुवादमाध्यमेन एव संस्कृतशिक्षणं प्रवर्तते येन छात्रेषु भाषागतकौशलानां सम्यक् विकासः न भवति। अतः छात्रशिक्षकमध्ये कक्षासु संस्कृतभाषायाम् अन्तः क्रिया भवेत् येन छात्राः।

1. संस्कृत भाषायां श्रवणावसरं लभेरन्,
2. सरलसंस्कृतवाक्यानि श्रुत्वा अर्थम् अवगच्छेयुः,
3. कक्षासु सामान्यव्यवहारे निपुणाः भवेयुः,
4. संस्कृतगद्यस्य पद्यस्य च मौनवाचने सस्वर–शुद्व–उच्चारणे च सक्षमाः भवेयुः,
5. निर्दिष्टशब्दसूचीसाहाय्ेन सरलसंस्कृतवाक्येषु अनुच्छेदलेखने, कथालेखने, पत्रलेखने योग्यतां धाआरयेयुः इति एतानि पाठ्यक्रमस्य लक्ष्याणि।

**सारांशत** : संस्कृतेन श्रवण–भाषण–वाचन–लेखन कौशलानां विकाशः अपेक्ष्यते। छात्राः केवलं कण्ठस्थीकरणं न कुर्युः अपितु चिन्तनप्रेरकप्रश्नानां माध्यमेन तेषां मौलिकसर्जनात्मकशक्तेरपि विकासः भवेत् इति आशास्यते।

### विशिष्टोद्देश्यानि

**श्रवणं–भाषणम्**

1. छात्राः कक्षासु शिष्टाचारपालने संस्कृतस्य प्रयोगं कुर्युः,
2. सरलनिर्देशान् श्रुत्वा तदनुसारं कार्य कुर्युः,
3. कक्षाव्यवहारे संस्कृतेन अनुमतिं प्राप्नुयुः,
4. सरलसंस्कृते प्रश्ननिर्माणे समर्थाः भवेयुः,
5. सरलसंस्कृतप्रश्नानां मौखिकरूपणे एकपदेन पूर्णवाक्येन वा उतराणि वक्तुं समर्थाः भवेयुः,
6. वर्णानाम् उच्चारणं श्रुत्वा उच्चारणस्थानं जानीयुः
7. सरलसंस्कृतवाक्येषु भावप्रकटनसामर्थ्य शुद्ववाक्यसंरचनाप्रावीण्यं वा गृह्णीयुः।

**वाचनम्**

**वाचनस्य अन्तर्गते छात्रेषु अधोलिखिताः दक्षताः अपेक्ष्यन्ते–**

1. प्रदतगद्यांशस्य पंद्याशस्य नाट्यांशस्य च मौनवाचनं, सस्वरवाचनम् अथ च भावपूर्णवाचनम्
2. गद्य–पद्य नाट्यादिपाठ्यवस्तु पठित्वा भाववबोधनम्,
3. सरलवाक्यानि पठित्वा पद–विशेषम् आधृत्य प्रश्ननिर्माणम्,
4. पाठ्यांशमधिकृत्य शीर्षकप्रदानम्,
5. पद्यानाम् अन्वयेषु। समुचितशब्दैः रिक्तस्थानपूर्तिः
6. पद्यानाम् प्रदतभावार्थेषु रिक्तस्थानपूर्तिः,
7. क्रमरहितवाक्यानि पठित्वा मौखिकरूपेण क्रमनिर्धारणम्,

## लेखनम्

**लेखनमधिकृन्य अधोलिख्ताः दक्षताः अपेक्षिताः –**

1. देवनागरीलिपिज्ञानम्, संयुक्तव्यज्नलेखनम्, स्वरव्यज्नसंयोगेने शब्द निर्माणम् शब्दानां विर्णविन्यासः,
2. वाक्येषु प्रतिपादिकानां सविभक्तिप्रयोगः
3. कर्तृपदैः सह क्रियायाः अन्वितिः,
4. विशेषण–विशेष्य पदानाम् अन्वितिः,
5. कर्तृ–तद्वितप्रत्ययानां सहायतया वाक्यनिर्माणम्,
6. कथानमाधृत्य प्रश्नलेखनम्,
7. अव्ययानां सार्थकशुद्वप्रयोगः,
8. विरामचिह्नानां समुचितप्रयोगः
9. क्रमरहितवाक्यानां समुचितप्रयोगः
10. घटनाक्रमानुसारम् अनुच्छेदस्य लेखनं, कथालेखन पत्रादिलेखनं च,
11. प्रदतसूचीसाहाय्येन चित्रवर्णनम्
12. चित्रमधिकृत्य प्रश्ननिर्माणम्,
13. अभिनन्दन–निमंत्रण–वर्धापनपत्राणां निर्माणं, प्राचार्य प्रति च प्रार्थनापत्रलेखनम्,
14. प्रदतवार्तालापे रिक्तस्थानपूरणम्।

## गतिविधयः

1. संस्कृतस्य समानानन्तर सूक्तिनां सुभाषितानां संग्रहणम् प्रदर्शनच्।
2. विविधप्रतियोगितानाम् आयोजनं श्लोकोच्चारणम्, कथोपकथनं, भाषणं नाट्यांशानाम् अभिनयश्च।
3. संस्कृतभाषावाक्यप्रयोगमाश्रित्य विविधक्रीडासु प्रतिभागित्वम्
4. शब्दकोशस्य प्रयोगे निपुण विकासाय छात्राणां स्वकीयशब्दकोशनिर्माणम्।
5. विविध–अवसरेषु प्रयोगार्थम् अभिनन्दन–निमंत्रण–वर्धापनपत्राणां निर्माणम्।
6. संस्कृतभाषायां भितिपत्रिकासम्पादनम्।
7. विद्यालयस्य पत्रिकायां संस्कृतविभागस्य योगदानम्।
8. छात्रैः कृतस्श कार्यस्य प्रदर्शनी–आयोजनम्।
9. संस्कृतवाचनम् अधिकृत्य ध्वनिपट्टिकानां निर्माणम्।

# संस्कृतम्

## विषयानुक्रमणिका


| | |
|---|---|
| प्रथमः पाठः | शुचिपर्यावरणम् |
| द्वितीयः पाठः | बुद्धिर्बलवती सदा |
| तृतीयः पाठः | शिशुलालनम् |
| चतुर्थः पाठः | जननी तुल्यवत्सला |
| प×चमः पाठः | सुभाषितानि |
| षष्ठः पाठः | सौहार्दं प्रकृतेः शोभा |
| सप्तमः पाठः | विचित्राः साक्षी |
| अष्टमः पाठः | सूक्तयः |
| नवमः पाठः | भूकम्पविभीषिका |
| दशमः पाठः | अन्योक्तयः |

| | |
|---|---|
| क खण्डः (अपठित – अवबोधनम्) | |
| ख खण्डः (रचनात्मकं कार्यम्) | |
| ग खण्डः (अनुप्रयुक्त– व्याकरणम्) | |
| घ खण्डः (पठित अवबोधनम्) | |

## 'क' खण्डः(अपठित – अवबोधनम्)
## (सरल गघांशम् आधारितं कार्यम्–गघांशद्वयम्)

1. 40–50 शब्दपरिमितः गद्यांशः (एकः सरलगद्यांशः)
   - एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि
   - भाषिककार्यम्
2. 80–100 शब्दपरिमितः गद्यांशः (एकः सरलगद्यांशः)
   (सरलकथा–घटनावर्णनम् वा)
   - एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि
   - एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि
   - समुचितशीर्षकप्रदानम्
   - **भाषिककार्यम्**
     1. वाक्ये क्रियापदचयनम्
     2. कर्तृक्रिया– अन्वितिः
     3. विशेषणविशेष्य–अन्वितिः
     4. संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः
     5. पर्यायं विलोमं वा पदं दत्वा अनुच्छेदे दत्तं पदचयनम्।

## 'ख' खण्डः (रचनात्मकं कार्यम्)

3. संकेताधारितम् अनौपचारिकपत्रम्
4. संकेताधारितः संवादलेखनम्
5. अनुच्छेदलेखनम् (निबन्धलेखनम्)

## 'ग' खण्डः (अनुप्रयुक्त–व्याकरणम्)

6. सन्धिकार्यम्
   - स्वरसन्धिः – दीर्घ, गुण, वृद्धि, यण, अयादिः, पूर्वरूप।
   - व्यंजनसन्धिः श्चुत्व, ष्टुत्व, तुक्–आगमः, मोऽनुस्वारः वर्गीयप्रथमाक्षराणां तृतीयर्णे परिवर्तनम् प्रथमवर्णस्य पंचमवर्णे परिवर्तनम्।
   - विसर्गसन्धिः – विसर्गस्य उत्वं, रत्वं, लोपः विसर्गस्थाने स्, श्, ष्।
7. समासः (वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः)
   - तुत्पुरूषः (विभक्तिः, नञ्, उपपदः)
   - कर्मधारयः (विशेषणाम्–विशेष्यम् उपमान–उपमेयम्)
   - द्विगुः

- द्वन्द्वः (इतरेतरः, समाहारः, एकशेषः)
- बहुब्रीहिः (समानाधिकरणम्)
- अव्ययीभावः (अनु, उप, सह, निर, प्रति, यथा)

8. प्रत्ययाः (प्रकृतिप्रत्यययोगेन वाक्यसंयोजनम्)
   - कृदन्ताः तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्।
   - तद्धिताः मतुप्, इन्, ठक्, त्व, तल्।
   - स्त्रीप्रत्ययै टाप्, डीप्।
9. अव्यय पदानि (कथायाम् अनुच्छेदे संवादे वा अव्ययानां प्रयोगः)
   अपि, इति, इव, उच्चैः, एव, कदा, कुतः नूनम्, पुरा, मा, नीचैः, खलु, सह, इतस्ततः, यत् अत्र–तत्र, यत्र–कुत्र, यदा–कदा, यथा–तथा–कदापि, यावत्–तावत्, विना, सहसा, श्वः, ह्यः, अधुना, बहिः वृथा, कदापि, शनैः किमर्थम्।
10. वाच्यपरिवर्तनम् (केवलं लट्लकारे)
11. घटिकाचित्रसाहाय्येन अंकाना स्थाने शब्देषु समय–लेखनम्
    (सामान्य – सपाद– सार्ध– पादोन)
12. पद परिचय (शब्दानां धातूनां च)
13. लिंगाधारित संख्यावाचकपदानि (एकतः दशपर्यन्तम्)
14. वाक्यानि संशोधयत् (अशुद्धवाक्यानां संशोधनम्)
    (वचन–लिंगा–पुरूष–विभक्ति–लकार–विशेषणविशेष्याध्यारितम्)

## 'घ' खण्डः (पठित–अवबोधनम्)

15. पठित–सामग्रीम् आधृत्य अवबोधनकार्यम्
    (अ) एकः पठित गद्यांशः
    (आ) एकः पद्यांशः (पठितः)
    (इ) एकः नाटकाशंः (पठितः)
    - भाषिककार्यम
      1. वाक्ये क्रियापदचयनम्
      2. कर्तृक्रिया–अन्वितिः
      3. विशेषणविशेष्य–अन्वितिः
      4. संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः
      5. पर्यायं विलोमं वा पदचयनम्
      6. कर्तृक्रियाचयनम्।
         (विशेषण–विशेष्यचयनम्, कर्तृकियाचयनम्, पर्यायविलोमचयनम्)
16. पाठ्यसामग्रीमाधृत्य हिन्दी भाषायामनुवादः।
    (अ) एकस्य गंद्याशस्य हिन्दीभाषायामनुवादः।
    (आ) एकस्य पंद्याशस्य सान्वयः हिन्दीभाषायामनुवादः।
17. रेखाडिंगतपदमाधृत्य प्रश्ननिर्माणम्।
18. शेमुषीपुस्तकस्य अभ्यासमधिकृत्य मेलनम्।
    (अ) पर्यायपदानां (समानार्थकपदानां) मेलनम्।
    (आ) विलोमशब्दानां (विपरीतार्थकपदानां) मेलनम्

19. 'शेमुषी' पाठ्यपुस्तकस्य अभ्यासेषु विविधाः प्रश्नाः सन्ति तत्र पर्याय–विलोमशब्दानां विहाय यत्किमपि मेलानार्थ प्रश्नाः विद्यन्ते, ततः परीक्षापत्रस्य निर्माता प्रश्नं प्रक्ष्यति। तद्यथा

- विशेषणविशेष्यमेलनम्।
- कोष्ठात् चित्वा पदानाम् अर्थः।
- वाक्यानि कः कं प्रति कथयति।
- शुद्धकथनानां समक्षम् **आम्** अशुद्धकथनानां समक्षम **न** लेखनम्।
- शुद्धं विकल्पं विचित्य रिक्तस्थानापूर्तिः (कोष्ठकात् विचित्य)
- शब्दमधिकृत्य वाक्यनिर्माणं वा।

एतेषु विषयेषु परीक्षापत्रनिर्माता किमपि एकं विषयमधिकृत्य प्रश्नं प्रक्ष्यति।